नामेवेष्टेस्त्वं न च तत्कारोच्चारणसामर्थ्यादिति वाच्यं। अतित्यमिति गौणे चरितार्थत्वात् संज्ञायां गौणत्वे चात्सत्वेन। स्यद्। स्यदौ। स्यदः। अतिस
द्। अतिस्यदौ। अतिस्यदः। यः। यौ। ये। एषः। एतौ। एते। अन्वादेशे तु एनं। एनौ। एनान्। एनेन। एनयोः। ङे प्रथमयोरम्। युष्मदस्मद्भ्यां परस्य ङे
इत्येतस्य प्रथमाद्वितीययोश्चामादेशः स्यात्। मपर्यन्तस्येत्यधिकृत्य। त्वाहौ सौ। युष्मदस्मदोर्मपर्यन्तस्य त्व अह इत्येतावादेशौ स्तः सौ परे। शेषे लो
पः। आत्वयत्वनिमित्तेतरविभक्तौ परतो युष्मदस्मदोरन्त्यस्य लोपः स्यात्। अतो गुणे। अमि पूर्वः। त्वं। अहं। ननु त्वं स्त्री अहं स्त्री। इत्यत्र परमपि त्वम
मुं अम इति स्थिते अमि पूर्वत्वं बाधित्वान्तरङ्गत्वाट्टाप् प्राप्नोति। सत्यं। अलिङ्गे युष्मदस्मदी। तेन स्त्रीत्वाभावान्न टाप्। यद्वा शेषे इति सप्तमी स्था
निनोधिकरणत्वविवक्षया तेन मपर्यन्ताच्छेषस्य अद्भागस्य लोपः। स च परोप्यन्तरङ्गे अतो गुणे कृते प्रवर्तते। अदन्तत्वाभावान्न टाप्। परमत्वं।
अतित्वं। परमाहं। अत्यहं। युवावौ द्विवचने। द्वयोरुक्तौ युष्मदस्मदोर्मपर्यन्तस्य युवावौ स्तो विभक्तौ। प्रथमायाश्च द्विवचने भाषायां। इत्युष्म
दस्मदोराकारोन्तादेशः स्यात्। ओ ङीत्येव सूत्रं च। भाषायां किम्। युवं वस्त्राणि। युवां। आवां। मपर्यन्तस्य किं। साकच्कस्य माभूत्। युवकां। आ
वकां। त्वयामयेत्यत्र च स्याम्येत आमकच्। युवकाभ्यां। आवकाभ्यामिति मनसिध्येत्। यूयवयौ जसि। स्पष्टं। यूयं। वयं। परमयूयं। परमवयं

अतियूयं। अतिवयं। इहशेषे लोपां सर्पेलोपे सेजसः शी प्राप्तः। अंगकार्ये कृतेनंगकार्यमिति न भवति ङेः प्रथमयोरिसत्र मकारांतं प्रक्लि
सिद्धके ष्यअमंतएवशिष्यते नतु विक्रियतेति व्याख्यानाद्य समावेकवचने। एकस्योक्तौ युष्मदस्मदोर्मपर्यंतस्य त्वमौ स्तः। द्वितीयायांच। युष्मदस्म
दोराकारः स्यात्। त्वां मां। युवां। आवां। शसोन। नेत विभक्तिकं पदं। युष्मदस्मद्भ्यां परस्य शसो नकारः स्यादमो पवादः। ओदः परस्य। संयोगांतस्य
२८ लोपः। युष्मान्। अस्मान्। योचि। अनयोर्यकारो देशः स्यादनादेशे अजादो विभक्तौ परे। त्वया। मया। युष्मदस्मदोरनादेशे। अनयो राकारः स्याद
नादेशे हलादौ परे। युवाभ्यां। आवाभ्यां। युष्माभिः। अस्माभिः। तुभ्यमह्यौ ङयि। अनयोर्मपर्यंतस्य तुभ्यमह्यौ स्तो ङयि। शेषे लोपे। तुभ्यं मह्यं
परमतुभ्यं। परममह्यं। अतितुभ्यं। अतिमह्यं। युवाभ्यां। आवाभ्यां। भ्यसो भ्यम्। भ्यम् अभ्यम् वा आदेशः स्यात्। आद्यः शेषे लोपस्यांत लोप
एव। तत्रांगवृत्तिपरिभाषया एत्वं न। अभ्यम् तु पक्षद्वयेपि साधु। युष्मभ्यं। अस्मभ्यं। एकवचनस्य च। आभ्यां पंचम्येकवचनस्यात् स्यात्। त्वत्म
त्। ङसिभ्रेतिसवर्णं। युवाभ्यां। आवाभ्यां। पंचम्या अत्। आभ्यां पंचम्या भ्यसोत् स्यात्। युष्मत्। अस्मत्। तवममौ ङसि। अनयोर्मपर्यंतस्य तवममौ
स्तो ङसि। युष्मदस्मद्भ्यां ङसोश। स्यात्। तव मम। युवयोः। आवयोः। साम आकं। आभ्यां परस्य साम आकं स्यात्। भाविनः सुटो निवृत्त्यर्थं ससुट्कनिर्देशः
युष्माकं। अस्माकं। त्वयि। मयि। युवयोः। आवयोः। युष्मासु। अस्मासु। समस्यमाने द्व्येकत्ववाचिनी युष्मदस्मदी। समासार्थोन्यसंख्यश्चेत्स्तो युवावो द्वि
मावपि। १ सुजसङेङस्सु परतः आदेशाः स्युः सदैवते। त्वाहौ यूयवयौ तुभ्यमह्यौ तवममावपि २ एते परत्वाद्बाधंते युवावौ विषये यस्वके। त्वमावपि प्रबाध
ते पूर्वविप्रतिषेधतः। द्व्येकसंख्यः समासार्थो युष्मबह्वर्थे युष्मदस्मदी। तयोरद्व्येकतार्थत्वान्न युवावौ त्वमौ न च ॥ त्वां मां वा अतिक्रांत इति अतित्वं। अहं।

अतित्वं। अतिमां। अतियूयं। अतिवयं। अतित्वां। अतिमां। अतित्वान्। अतिमान्। अतित्वया। अतिमया। अतित्वाभ्यां २ अतिमाभ्यां ३ अतित्वाभिः।
अतिमाभिः। अतितुभ्यं। अतिमह्यं। अतित्वभ्यं। अतिमह्यं। ङसिभ्यसोः। अतित्वत्। अतिमत्। भ्याम्भिप्राग्वत्। भ्यति ङसिवत्। अतितव। अतिमम। अतित्व
योः २ अतिमयोः २ अतित्वाकं। अतिमाकं। अतित्वयि। अतिमयि। अतित्वासु। अतिमासु। युवामावां वाति क्रांत इति विग्रहे सुजसङेङस्सु प्राग्वत्।
ओ अम् औट्सु। अतियुवां। अतिसावां। अतियुवान्। अत्सावान्। अतियुवया। असावया। अतियुवाभ्यां ३ असावाभ्यां ३ अतियुवाभिः। असावा
भिः। भ्यसि। अतियुवभ्यं। असावभ्यं। ङसिभ्यसोः। अतियुवत्। असावत्। ओसि। अतियुवयोः २ असावयोः। अतियुवाकं। असावाकं। अतियु
वयि। असावयि। अतियुवासु। असावासु। युष्मानस्मान्वेत्यत्रापि स्वजसङेङस्सु प्राग्वत्। ओ अम् औट्सु। अतियुष्मां असस्मां। अतियु
ष्मान् अस्मान्। अतियुष्मया। असस्मया। अतियुष्माभ्यां। असस्माभ्यां। अतियुष्माभिः। असस्माभिः। भ्यसि। अतियुष्मभ्यं। असस्मभ्यं
ङसिभ्यसोः। अतियुष्मत्। असस्मत्। ओसि अतियुष्मयोः। असस्मयोः २ अतियुष्माकं। असस्माकं। अतियुष्मयि। असस्मयि। अति
युष्मासु। असस्मासु। पदस्य। पदात्। अनुदात्तं सर्वमपादादावित्यधिकृत्य। युष्मदस्मदोः षष्ठी चतुर्थी द्वितीयास्थयोर्वान्नावौ। पदात्परयो
रपादादौ स्थितयोरनयोः षष्ठ्यादिविशिष्टयोर्वान्नावित्यादेशौ स्तः स्तौ चानुदात्तौ। बहुवचनस्य वस्नसौ। उक्तयोर्विधयोरनयोः
षष्ठ्यादि बहुवचनांतयोर्वस्नसौ स्तो वांनावोरपवादः। तेमयावेकवचनस्य। उक्तविधयोरनयोः षष्ठी चतुर्थ्येकवचनांतयोस्तेमे एतौ स्तः।
त्वामौ द्वितीयायाः। द्वितीयैकवचनांतयोस्त्वामा एतौ स्तः। श्रीशस्त्वावतु मापीह दत्तात्ते मेपि शर्म सः। स्वामी ते मेपि स हरिः पातु वामपि

सिद्धां· नोविष्णुः। सुखंवानोदत्तात्वीशः पतिर्वामपिनोहरिः। सोऽव्याद्वोनः शिवंवोनोदद्यात्सेव्योत्रवः सनः १ पदात्परयोः किं। वाक्यादौमाभूत्। त्वांपातु।
मांपातु। अपादादौ किं। वेदैरशेषैः संवेद्योऽस्मान्कृष्णः सर्वदावतु। स्थग्रहणाच्छ्रूयमाणविभक्तिकयोरेव नेह। इतियुष्मत्पुत्रोब्रवीति। इत्यस्मत्पुत्रोब्रवीति
समानवाक्येनिघातयुष्मदस्मदादेशावक्तव्याः। एकतिङ्‌वाक्यंतेनेह न। ओदनंपचतवभविष्यति इहैवतुस्यादेव। शालीनांते ओदनंदास्यामीति एतेवां
३५ नावौ देशायआदेशाअनन्वादेशेवावक्तव्याः। अन्वादेशेतुनित्यंस्युः। धातातेभक्तोस्ति। धातातवभक्तोस्तीतिवा। तस्मैतेनमइत्येव नचवाहाहैवयुक्ते। चा
दिपंचकयोगेनैतेआदेशास्युः। हरिस्त्वांमांचरक्षतु। कथंत्वांमांवानरक्षेदित्यादि। युक्तग्रहणात्साक्षाद्योगेयंनिषेधः। परंपरासंबंधेतुआ
देशःस्यादेव। हरोहरिश्चमेस्वामी। पश्यार्थैश्चानालोचने। अचाक्षुषज्ञानार्थैर्धातुभिर्योगेएतेआदेशानस्युः। चेतसात्वांसमीक्षते। परंपरा
संबंधेप्ययंनिषेधः। भक्तस्तवरूपंध्यायति। आलोचनेतुभक्तस्त्वापश्यतिचक्षुषा। सपूर्वायाःप्रथमायाविभाषा। विद्यमानपूर्वात्प्रथमांता
त्परयोरन्वादेशेप्यादेशावास्युः। भक्तस्त्वमप्यहंतेनहरिस्त्वात्रायतेसमा। त्वांमेतिवा। सामंत्रितं। संबोधनेयाप्रथमातदंतमामंत्रितसं ३५
ज्ञंस्यात्। आमंत्रितंपूर्वमविद्यमानवत्स्यात्। अग्नेतव। देवास्मान्पाहि। अग्नेनय। अग्नइंद्रवरुण। इहयुष्मदस्मदोरादेशास्तिङ्‌तनि
घातआमंत्रितनिघातश्चन। सर्वदारक्षदेवनइत्यत्रतुदेवेत्यस्याविद्यमानवत्त्वेपिनतःप्राचीनंरक्षेत्येतदाश्रित्यादेशः। एवंइमंमेगंगेय
मुने इतिमंत्रेयमुनइत्यादिश्च प्राचीनामंत्रिताविद्यमानवत्त्वेपि मेशब्दमेवाश्रित्यसर्वेषांनिघातः। नामंत्रितेसमानाधिकर

णेसामान्यवचनं विशेष्यंसमानाधिकरणेविशेषणेआमंत्रितेपरेनाविद्यमानवत्स्यात्। हरेदयालोनःपाहि। अग्नेतेजस्विन्। विभाषितं
विशेषवचने अत्रभाष्येबहुवचनमितिवक्ष्यामीति। बहुवचनांतंविशेष्यंसमानाधिकरणेआमंत्रितेपरेविद्यमानवद्वास्यात्। यूयंत्र
यवःदेवाःशरण्याः। युष्मान्भजेदेवाःशरण्याःवोभजे। अन्वादेशेपिवैकल्पिकाआदेशाः। सुपात्। सुपादौ। सुपादः। सुपादं।
सुपादौ। पादःपत्। पाच्छब्दांतंयदंगंभंतदवयवस्यपाच्छब्दस्यपदादेशःस्यात्। सुपदः। सुपदा। सुपाद्भ्यामित्यादि। अग्निंमथ्नातीति अग्निमत्।
अग्निमद्। अग्निमथौ। अग्निमथः। अग्निमद्भ्यामित्यादि। ऋत्विगादिसूत्रेण अंचेःसुप्युपपदेक्विन्। अनिदितांहलउपधायाःक्ङिति। हलं
तानामनिदितामंगानामुपधायानस्यलोपःस्यात्क्ङिति। उगिदचामितिनुम्। संयोगांतस्यलोपः। क्विन्प्रत्ययस्येतिकु
त्वेनङकारः। प्राङ्। अनुस्वारपरसवर्णौ। प्राञ्चौ। प्राञ्चः। प्राञ्चं। प्राञ्चौ। अचः। लुप्तनकारस्यांचतेर्भस्याकारस्यलोपःस्यात्। चौ। लुप्ता
कारनकारेंचतौपरेपूर्वस्याणोदीर्घःस्यात्। प्राचः। प्राचा। प्राग्भ्यामित्यादि। प्रत्यङ्। प्रत्यञ्चौ। प्रत्यञ्चः। प्रत्यञ्चं। प्रत्यञ्चौ। अचैलोपस्यप
क्षेअंतरंगोपियणनप्रवर्तते। अकृतव्यूहाइतिपरिभाषया। प्रतीचः। प्रतीचा। अमुमंचतीतिविग्रहे। अदस्। अंच इतिस्थिते। इति विष्व
ग्देवयोश्चटेरद्र्यंचतौवप्रत्यये। अनयोःसर्वनाम्नश्चटेरद्र्यादेशःस्याद्वप्रत्ययांतेंचतौपरे। अदद्रिअंच् इतिस्थिते। यणि॥ ॥

सिद्धां. अदसोसेर्दादुदोमः। अदसोऽसान्तस्यदात्सरस्यउदूतौस्तोदस्यमश्च। उदूतिफ्रस्वदीर्घयोः समाहारद्वंद्वः। आंतरतम्याद्ध्रस्वव्यंजनयो
र्ह्रस्वोदीर्घस्यवदीर्घः। अमुमुयङ्। अमुमुयञ्चौ। अमुमुयञ्चः। अमुमुयञ्चं। अमुमुयञ्चौ। अमुमुईचः। अमुमुईचा। अमुमुयग्भ्यां
इत्यादि। मुत्वस्यासिद्धत्वान्नयणः। अंत्सबाधेंऽत्यसदेशस्येतिपरिभाषाश्रित्य परस्यैवमुत्वंवदंतांमते अदमुयङ्। असेः सकारस्य
२५ स्थानेयस्यसअसिरितिव्याख्यानात्सदाद्यत्वविषयएवमुत्वं। नान्यत्रेतिपक्षे अदद्र्यङ्। उक्तंच। अदसोद्रेः पृथङ्मुत्वं केचिदिच्छंतिल
त्ववत्। केचिदंत्यसदेशस्यनेत्येकेसेर्हिदृश्यते। विष्वग्देवयोः किं। अश्वाची। अंचतौ। किं। विष्वग्युक्। वप्रसयेकिं। विष्वगंचनं। वप्रसयग्र २६
हणं ज्ञापयति। अन्यत्रधातुग्रहणे तदादिविधिरिति तेनायस्कारः। उदङ्। उदञ्चौ। उदञ्चः। उदञ्चं। उच्छ्वासस्यलुप्तनकारस्यांचतेर्भ
स्याकारस्यईत्स्यात्। उदीचः। उदीचा। उदग्भ्यामित्यादि। समः समि। वप्रसयांतेंच तोपरे समः समिरादेशः स्यात्। सम्यङ्। सम्यञ्चौ।
सम्यञ्चः। समीचः। समीचा। सहस्यसध्रिः। सध्र्यङ्। तिरसस्तिर्यलोपे। अलुप्ताकारेंचतो वप्रसयांते परे तिरसस्तिर्यादेशः स्यात्। ति
र्यङ्। तिर्यञ्चौ। तिर्यञ्चः। तिरश्चः। तिरश्चा। तिर्यग्भ्यामित्यादि। नांचेः पूजायां। पूजार्थस्यांचतेरुपधाया नस्यलोपो नस्यात्। अलुप्तनका
रत्वान्नुम्। प्राङ्। प्राञ्चौ। प्राञ्चः। नलोपाभावादकारलोपोन। प्राञ्चः। प्राञ्चा। प्राङ्भ्यां। प्राङ्क्षु। प्राङ्क्षु। एवंपूजार्थेप्रत्यङादयः॥ ॥

कुंचकौटिल्याल्पीभावयोः अस्यऋत्विगादिना नलोपाभावो निपात्यते। क्रुङ्। क्रुञ्चौ। क्रुञ्चः। क्रुङ्भ्यामित्यादि। चोः कुः। पयोमुक्। पयोमुग्।
पयोमुचौ। पयोमुचः। व्रश्चेतिषत्वम्। स्कोरितिसलोपः। जश्त्वचर्त्वे। सुवृट्। सुवृड्। सुवृश्चौ। सुवृट्सु। सुवृट्त्सु। महपूजायां। वर्तमानेपृष
द्बृहन्महज्जगच्छतृवच्च। एतेनिपात्यंतेशतृवच्चैषां कार्यंस्यात्। उगित्वान्नुम्। सांतमहत इति दीर्घः महते पूज्यत इति महान्। महांतौ। महां
तः। हेमहन्। महता। महद्भ्यामित्यादि। अत्वसंतस्यचाधातोः। अत्वंतस्योपधायादीर्घः स्यात् धातुभिन्नासंतस्य चासंबुद्धौ सौपरे। परंनि
त्यंचनुमं बाधित्वा वचनसामर्थ्यादादौदीर्घः। ततो नुम्। धीमान्। धीमंतौ। धीमंतः। हेधीमन्। शसादौमहद्वत्। धातोरप्यत्वंतस्यदीर्घः। गोम
तमिच्छतिगोमानिवाचरतिवा क्यजंतात् क्वाचाराक्विवंतात्कर्तरिक्विप्। उगिदचामितिसूत्रे ग्रहणानियमार्थं धातोश्चेदुगित्कार्यं तर्ह्यंचत
रेवेति। तेनस्रत् ध्वत्। इत्यादौन। अधातोरितितु अधातुभूतपूर्वस्यापिनुमर्थं। गोमान्। गोमंतौ। गोमंत इत्यादि। भातेर्डवतुः। भवान्।
भवंतौ। भवंतः। हेभवन्। शत्रंतस्यतु अत्वंतत्वाभावान्नदीर्घः। भवतीतिभवन्। उभेअभ्यस्तं। षाष्ठद्वित्वप्रकरणे ये विहितेते उभे। समुदि
तेअभ्यस्तसंज्ञेस्तः। नाभ्यस्ताच्छतुः। अभ्यस्तात्परस्यशतुर्नुम्नस्यात्। ददत्। ददतौ। ददतः। ददतं। जक्षित्यादयः षट्। षट्धातवोन्येजक्षिति
श्चसप्तम एते अभ्यस्तसंज्ञास्युः। जक्षत्। जक्षतौ। जक्षतः। एवंजाग्रत्। दरिद्रत्। चकासत्। शासत्। दीधीवेव्योर्ङित्वेपिछांदसत्वाद्
ल्पेनपरस्मैपदं। दीध्यत्। वेव्यत्। गुप्। गुब्। गुपौ। गुपः। गुब्भ्यामित्यादि। त्यदादिषुदृशोनालोचने कञ्च। त्यदादिषूपपदेषु अ

कार

ज्ञानार्थो दृशेर्धातोः क्स्यात् । चात्क्विन् । आ सर्वनाम्नः । सर्वनाम्न आकारोंतादेशः स्यात् । दृगादेशावतुषु । कुत्वस्यासिद्ध
त्वाद्व्रश्चेति षः तस्य जश्त्वेन डः । तस्य कुत्वेन गः । तस्य चर्त्वेन पक्षे कः । तादृक् । तादृग् । तादृशौ । तादृशः । षत्वापवादत्वात् कुत्वेन
खकार इति कैयटहरदत्तादिमते चर्त्वाभावपक्षे खं देव श्रूयेत न तु गः अथ षत्वं प्रति कुत्वस्यासिद्धत्वात् दृगादिभ्यो यत् इति निर्दे
३८ शाद् नासिद्धत्वमिति बोध्यं व्रश्चेति षत्वं जश्त्वचर्त्वे । विट् विड् । विशौ विशः । नशेर्वा । नशेः कवर्गोन्तादेशो वा स्यात्पदांते । नक्
नग् । नट् । नड् । नशौ । नशः । नड्भ्यां । नग्भ्यां । स्पृशोनुदके क्विन् । अनुदके सुप्युपपदे स्पृशेः क्विन् स्यात् । घृतस्पृक् । घृतस्पृग् ।
घृतस्पृशौ । घृतस्पृशः । क्विन्प्रत्ययो यस्मादिति बहुव्रीह्याश्रयणात् । क्विप्यपि स्पृट् स्पृक् । स्पृग् । षड्गकाः प्राग्वत् । ञिधृ
षा प्रागल्भ्ये । अस्मात् ऋत्विगादिना क्विन् । द्वित्वमंतोदात्तत्वं च निपात्यते । कुत्वात्पूर्वं जश्त्वेन डः गः कः । धृष्णोतीति । दधृक् । दधृ
षौ । दधृग्भ्यां । रत्नानि मुष्णातीति रत्नमुट् । रत्नमुड् । रत्नमुषौ । रत्नमुषः । षडो लुक् । षट् । षड् । षड्भिः । षड्भ्यः । षट् ३८
चतुर्भ्यश्चेति नुट् । अनामिति पर्युदासात् न ष्टुत्वनिषेधः । यरोनुनासिक इति बाधित्वा प्रत्यये नित्यवचनात् नित्यमनुनासिकः
षण्णां । षट्सु । तदंतविधिः । परमषड्भिः । परमषण्णां । गौणत्वे तु प्रियषषः । प्रियषषां । ~~रुत्वं प्रति षत्वस्यासिद्धत्वात्ससजुषोरु~~

रिति रुत्वं । वोरुपधाया दीर्घ इकः । रेफवांतस्य धातोरुपधाया इको दीर्घः स्यात्पदांते । पिपठीः । पिपठिषौ । पिपठिषः । पिपठी
र्भ्यां । शर्वोरीति वा विसर्जनीयः । नुम्विसर्जनीयशर्व्यवायेपि । एतैः प्रत्येकं व्यवधानेपीण्कुभ्यां परस्य सस्य मूर्द्धन्यादे
शः स्यात् । ष्टुत्वेन पूर्वस्य षत्वं पिपठीष्षु । पिपठीःषु । प्रत्येकमिति व्याख्यानादनेकव्यवधाने षत्वं । इदितो नुम् धातोरिति नुम् न
निंस्त । निंस्ते । नुम्ग्रहणं । नुम्स्थानिकानुस्वारोपलक्षणार्थमिति व्याख्यानात् । तेनेह न । हिसि हिंसायां क्विप् । इदितो नु
म्धातोरिति नुम् । अनिदितामिति इकारेत्वान्न । स्फहिन्सः । पुंसः । अतएव धात्वग्रहणेन गतार्थता । रात्सस्येति सलोपे
विसर्गः । चिकीः । चिकीर्षौ । चिकीर्षः । रोः सुपीति नियमान्न विसर्गः । चिकीर्षु । दमेर्डोस् । डित्वसामर्थ्याट्टिलोपः । षत्वस्यासिद्ध
त्वाद्रुत्वविसर्गौ । दोः । दोषौ । दोषः । पद्दन्निति वा दोषन् । दोर्भ्यां । दोषः । दोषा । दोष्णा । विश प्रवेशने । सनंतात् क्विप् । ~~स्कोरिति कलो~~
प ~~कत्व~~ षत्वस्यासिद्धत्वात् संयोगांतलोपः । व्रश्चेति षः । जश्त्वचर्त्वे । विविट् । विविड् । षढोः कः सीति कः । विविक्षौ । विविक्षः । स्को
रिति कलोपः । तट् । तड् । तक्षौ । तक्षः । गोरट् । गोरड् । गोरक्षौ । गोरक्षः । तक्षिरक्षिभ्यां ण्यंताभ्यां क्विपि तु स्कोरिति न प्रवर्तते ।
णिलोपस्य स्थानिवद्भावात् पूर्वत्रासिद्धीयं न स्थानिवदिति तु तस्य दोषः । संयोगादिलोपे लत्वणत्वेष्विति निषिद्धत्वात् तस्मात्स

तृ

सि॰ कौ॰

२८

योगांतलोपस्य—तक्। तग्। गोरक्। गोरग्। स्कोरिति कलोपं प्रति कुत्वस्यासिद्धत्वात्संयोगांतलोपः। पिपक्। पिपग्। दिधक्। एवं विव
क्। पिसगतौ। सुष्ठु पेसतीति सुपीः। सुपिसौ। सुपिसः। सुपिसा। कपीर्थ्यां। सुपीष्षु। सुपीःषु। एवं सुतुः। तुस खंडने। विद्वान्। विद्वांसौ। वि
द्वांसः। हे विद्वन्। विद्वांसं विद्वांसौ। वसोः संप्रसारणं। वस्वंतस्य भस्य संप्रसारणं स्यात्। पूर्वरूपत्वं। षत्वं। विदुषः। विदुषा। वसुस्रं
स्विति दत्वं। विद्वद्भ्यामित्यादि। सेदिवान्। सेदिवांसौ। सेदिवांसः। सेदिवांसं। सेदिवांसौ। अंतरंगोपीडागमः संप्रसारणविषयेन
प्रवर्त्तते अकृतव्यूहाः पाणिनीया इति परिभाषया। सेदुषः। सेदुषा। सेदिवद्भ्यामित्यादि। सांत महतः संयोगस्य सांत संयोगोपि प्राति
पदिकस्यैव गृह्यते न तु धातोः। महच्छब्दसाहचर्यात्। सुष्ठु हिनस्तीति सुहिन्। हिसि हिंसायां। इदितो नुम् धातोरिति नुम्। सुहिन्।
सुहिंसौ। सुहिंसः। सुहिन्भ्यां। सुहिन्सु। ध्वत्। ध्वद्। ध्वसौ। ध्वसः। ध्वद्भ्यां। एवं स्रत्। पुंसोऽसुङ्। सर्वनामस्थाने विवक्षिते असुङ् स्यात्। २८
उकार उच्चारणार्थः। बहुपुंसी सत्र उगितश्चेति ङीब्बर्थं कृतेन पुंनोऽसुङ् सुनीति प्रसज्यस्योगित्वे नैव नुम् सिद्धः। पुमान्। पुमांसौ। पु
मांसः। हे पुमन्। पुमांसं। पुमांसौ। पुंसः। पुंसा। पुंभ्यां। पुंभिः। पुंसु। सदुशनेत्यनङ्। उशना। उशनसौ। उशनसः। अस्य संबुद्धौ वा
नङ्। नलोपश्च वा वाच्यः। हे उशनन्। हे उशन। हे उशनः। उशनोभ्यामित्यादि। अनेहा। अनेहसौ। अनेहसः। हे अनेहः। वेधाः।

प्र

वेधसौ। वेधसः। हे वेधः। वेधोभ्यामित्यादि। अधातोरित्युक्तेर्नेह दीर्घः सुष्ठु वस्ते इति सुवः। सुवसौ। सुवसः। पिंडं ग्रसते इति पिंडग्रः। यसुरल
सु अदने। अदस औ सुलोपश्च। अदस औकारोंतादेशः स्यात् सौ परे। सुलोपश्च। तदोः सः सावितिद स्यौ। असौ। औत्वं प्रतिषेधः साकच्कस्य वा वक्तव्यः। सादुत्वंच। प्रतिषेधसान्नियोगशिष्टमुत्वं तदभावेन प्रवर्त्तते। असकौ। असुकः। त्यदाद्यत्वं। पररूपत्वं। वृद्धिः। अदसोसेरि
तिमत्वे पूर्वे। अमू। जसः शी। आद्गुणः। एत ईद्बहुवचने। अदसोदात्परस्यैत ईत् स्यात्। दस्य च मो बहुत्वार्थोक्तौ। अमी। पूर्वत्रासिद्धमिति विभक्ति
कार्यं प्राक् पश्चादुत्वमत्वे। अमुं। अमू। अमून्। मुत्वे कृते घिसंज्ञायां नाभावः। न मु ने। नाभावे कर्त्तव्ये कृते च मुभावो नासिद्धः स्यात्। अमुना।
अमूभ्यां। अमीभिः। अमुष्मै। अमूभ्यां। अमीभ्यः। अमुष्मात्। अमुष्य। अमुयोः। अमीषां। अमुष्मिन्। अमुयोः। अमीषु। इति ह
लंताः पुंलिंगाः। नहो धः। नहो हस्य धः स्यात्। झलि पदांते। उपानत्। उपानद्। उपानहौ। उपानहः। उपानद्भ्यां। उपानत्सु। उत्पूर्वा
तं स्निह प्रीतावित्यस्मात् ऋत्विगादिना क्विन्। निपातनाल्लोपषत्वे। क्विन्नंतस्य कुत्वेन हस्य घः। अरत्वचर्त्वे। उष्णिक्। उष्णिग्। उष्णिहौ।
उष्णिहः। उष्णिग्भ्यां। उष्णिक्षु। द्यौः। दिवौ। दिवः। दिवौ। दिवौ। दिवः। द्युभ्यां। द्युषु। गीः। गिरौ। गिरः। एवं पूः। पुरौ। पुरः। चतुरश्चतस्रा
देशः। चतस्रः। चतसृणां। किमः कादेशे टाप्। का। के। काः। सर्ववत्। यः सौ। इदमो दस्य यः स्यात् सौ। इयमिमाः। इयं। त्यदाद्यत्वे टाप्।

५

सिद्धां. इश्चेतिमः। इमे। इमाः। इमां। इमे। इमाः। अनाप्यकः। आङिचापः। अनया। हलिलोपः। आभ्यां। आभिः। अस्यै। अस्याः। अनयोः। आसां।
अस्यां। अनयोः। आसु। अन्वादेशेतु एनां। एने। एनाः। एनया। एनयोः। २ सात्विगादिनास्रजेःक्विन्। अमागमश्च निपातितः। स्रक्। स्रजौ। स्र

३९ जः। स्रग्भ्यां। स्रक्षु। सदाद्यत्वं। टाप्। स्या। से। सां। एवंतद्यद् एतद्। वाक्। वाग्। वाचौ। वाचः। वाचा। वाग्भ्यां। वाक्षु। अप्शब्दोनित्यबहु
वचनांतः अप्तृन्नितिदीर्घः। आपः। अपः। अपोभिः। अपस्तकारः स्यौभादौ प्रत्ययेपरे। अद्भिः। अपां। अप्सु। दिक्। दिग्। दिशौ। दिशः।
दिग्भ्यां। दिक्षु। सदादिष्विति दृशेः क्विन्विधानात्दन्यत्रापिकुत्वं। दृक्। दृग्। दृशौ। दृशः। त्विट्। त्विड्। त्विषौ। त्विषः। त्विड्भ्यां। त्विट्सु।
सहजुषतइतिसजूः। सजुषौ। सजुषः। सजूर्भ्यां। सजूःषु। सजूष्षु। षत्वस्यस्यासिद्धत्वाद्रुत्वं। आशीः। आशिषौ। आशिषः। आशीर्भ्यां।
असौ। सदाद्यत्वं। टाप्। औङःशी। उत्वमत्वे। अमू। अमूः। अमूं। अमू। अमूः। अमुया। अमूभ्यां। अमूभिः। अमुष्यै। अमूभ्यां। अ
मूभ्यः। अमुष्याः। २। अमुयोः। अमूषां। अमुष्यां। अमुयोः। अमूषु॥ ॥ इतिहलंताः स्त्रीलिंगाः स्वमोर्लुक् दत्वं। स्वनडुत्। स्वनडुद्। ३९
स्वनडुही। चतुरनडुहोरित्याम्। स्वनड्वांहि। पुनस्तद्वत्। शेषंपुंवत्। दिवउत्। अहर्विमलद्यु। अंतर्वर्तिनींविभक्तिमाश्रित्यपूर्वपदस्येवोत्त
रखंडस्यापिपदसंज्ञायांप्राप्तायां उत्तरपदत्वेचापपदादिविधौप्रतिषेधइतिप्रत्ययलक्षणेन। विमलदिवी। विमलदिवि। अपदादि
विधौकिं। दधिसेचौ। इहषत्वनिषेधेकर्तव्येपदत्वमस्त्येव। कुर्वन्तुन। वाः। वारी। अप्रत्ययांतत्वान्नुम्न। वारि। चत्वारि। नलुमते

धु

उत्तरस्य नाम उत्तरपदस्य पदत्वे नाम परोक्षके कार्ये कर्तव्ये:

तिकादेशेन। किं। के। कानि। इदं। इमे। इमानि। अन्वादेशेनपुंसके एनद्वक्तव्यः। एनत्। एने। एनानि। एनेन। एनयोः। २। ब्रह्म। हेब्रह्मन्। हेब्रह्म। ब्रह्म
णी। ब्रह्माणि। रोऽसुपि। अहर्भाति। विभाषाङिश्योः। अह्नि। अहनी। अहानि। अहन्। अहन्नित्यस्यरुःस्यात्पदांते। अहोभ्यां। अहोभिः।
इहअहः। अहोभ्यामित्यादौ रत्वरुत्वयोरसिद्धत्वान्नलोपेप्राप्तेअहन्निसावर्थ्येनलोपाभावनिपातद्वितीयेनरुर्विधेयः। तदंतस्या
पिरत्वरुत्वेदीर्घाण्यहानियस्मिन्सदीर्घाहः। निदाघः। इहहल्ङ्याबादिलोपेप्रत्ययलोपेप्रत्ययलक्षणेनासुपिइतिनिषेधात्तत्वाभावहत्व ५
स्यासिद्धत्वान्नांतलक्षणउपधायादीर्घः। संबुद्धौतु हेदीर्घाहः। निदाघ। दीर्घाहानौ। दीर्घाहानः। दंडि। दंडिनी। दंडीनि स्रग्वि। स्रग्वि
णी। स्रग्वीणि। वाग्मि। वाग्मिनी। वाग्मीनि। बहुवृत्रहाणि। बहुपूषाणि। बहुर्यमाणि। असृज्। पदांतत्वेकुत्वं। सृजेः क्विनो विधान
त्। विश्वसृड्डादौतुन। सृजिदृशोरितिसूत्रे रज्जुसृजेत्यादौ भितिभाष्यप्रयोगात्। यद्वा। व्रश्चादिसूत्रे सृजियजोः पदांतेषत्वं कुत्वाप
वादः। ऋत्विग्दधृक्स्रग्दिगुष्णिगंचुयुजिक्रुंचांचेतिकुत्वं निपातनाद्वकुत्वं। असृक्शब्दस्तु असृगितिरौणादिकेऽसृक्प्रत्ययेबोध्यः। असृक्। असृग्। अ
सृजी। असृंजि। पद्दन्नित्यादिनाऽसन्। असानि। असृजा॥ अस्ना॥ असृग्भ्यां। इत्यादि। ऊर्क्। ऊर्ग्। ऊर्जी। ऊर्ञ्जि। नरजानांसंयो
गः। बहूर्जि नुम्प्रतिषेधः। अंत्यात्पूर्वोवानुम्। बहूर्ञ्जि। बहूर्जि वा कुलानि। सद्। सत्। सौत्यानि। तद्। तत्। ते। तानि। यत्।

सि कौ. यद्। ये। यानि। एतद्। एतत्। एते। एतानि। अन्वादेशे तु एनत्। बेभिद्यतेः क्विप्। बेभित्। बेभिद्। बेभिदी। शौ अल्लोपस्य स्थानिवत्त्वाद् झलं
तत्वान्नुम्। अजंतलक्षणस्तु न नुम्। स्वविधौ स्थानिवत्त्वाभावात्। बेभिदि। ब्राह्मणकुलानि। चेछिदि। गवाक् शब्दस्य रूपाणि क्लीबे वीग
तिभेदतः। असंध्यवङ्पूर्वरूपैर्नवाधिकशतं मतं। स्वमोः सुपुनर्नपङ्क्तौ दोषङ्क्तूस्युस्त्रीणि जस्शसोः। चत्वारि शेषे दशकैकरूपाणीति विभाव
४ य। तथाहि। गामंचतीति विग्रहे ऋत्विगादिना क्विन्। गतौ नलोपः। अवङ् स्फोटायनस्येत्यवङ्। गवाक्। गवाग्। सर्वत्र विभाषेति प्रकृ
तिभावे गोअक्। गोअग्। पूर्वरूपे गोक्। गोग्। पूजायां नस्य कुत्वेन ङः। गवाङ्। गोअङ्। गोङ्। अस्यापि एतान्येव नव। औङः शी। भस्यादच
इत्यलोपः। गोची। पूजायां तु गवांची। गोअंची। गोंची। जस्शसोः शिः। शेः सर्वनामस्थानत्वान्नुम्। गवांचि। गोअंचि। गोंचि। गतिपूज
योः स्त्रीण्येव। गोचा। गवांचा। गोअंचा। गोंचा। गवाग्भ्यां। गोअग्भ्यां। गोग्भ्यां। गवाङ्भ्यां। गोऽङ्भ्यां। गोङ्भ्यामित्यादि। सुपि तु ङ्नतानां ४
पक्षे ङ्णोः कुक्टुगिति कुक्। गवाङ्क्षु। गोअङ्क्षु। गोङ्क्षु। गवाङ्क्षु। गोअङ्क्षु। गोङ्क्षु। गवाक्षु। गोअक्षु। गोक्षु। नचैवं चयोर्द्विती
याः शरि पक्षे ककारस्य खकारेण षण्णामाधिक्यं शंक्यं। चर्त्वस्यासिद्धत्वात्। कुक्पक्षे तु तस्याऽसिद्धत्वात् ङुत्वाभावपक्षे द्वितीय
देशात्। त्रीणि रूपाणि वर्धंत एव। ङमुण्नित्यमिषां द्विर्वचनानुनासिकविकल्पनात्। रूपाण्यसंख्यातानि भवंतीति मनीषिभिः। तिर्यक्
। तिर्यग्। तिरश्ची। तिर्यंचि। पूजायां तु तिर्यङ्। तिर्यंची। तिर्यंचि। यकृत्। यकृद्। यकृती। यकृंति। पद्दन्निति यकन्। यकानि।

दंतस्य क्लीबस्य
यक्न। यकृता। शकृत्। शकृती। शकृंति। शकानि। शक्ना। शकृता। ददत्। ददती। वा नपुंसकस्य। अभ्यस्तात्परो यः शता तदंतस्य नुम् वा स्यात् स ता
र्वनामस्थाने परे। ददंति। ददति। तुदत्। आच्छीनद्योर्नुम्। अवर्णांतादंगात्परो यः शतुरवयवस्तदंतस्य नुम् वा स्यात् शीनद्योः पर
तः। तुदंती। तुदती। तुदंति। भात्। भाद्। भांती। भाती। भांति। पचत्। शप्श्यनोर्नित्यं। शप्श्यनोरात्परो यः शतुरवयवस्तदंतस्य नित्यं
नुम् स्यात् शीनद्योः। पचंती। पचंति। दीव्यत्। दीव्यंती। दीव्यंति। स्वप्। स्वब्। स्वपी। नित्यात्सरोदपि नुमः प्राक् अप्तृन्निति दीर्घः प्रातिपदोक्त
सिद्धि त्वात्। स्वांपि। निरस्परतः। स्वकाशात्वंप्रतिपदोक्तपक्षे तु अप्तृन्निति दीर्घविरह नुमेव। स्वंपि। स्वप। स्वपाभिः। स्वब्भ्यां। स्वप्सु। अन्तीदीर्घ १४पदी
ना धनेरुस्। पत्वस्यासिद्धत्वाद्रुत्वं। धनुः। धनुषी। सांतेति दीर्घः। नुम्विसर्जनीयेति षत्वं। धनूंषि। धनुषा। धनुर्भ्यां। एवं चक्षुर्हविरादयः
। पिपठिषतेः क्विप्। वीरितिदीर्घः। पिपठीः। पिपठिषी। अल्लोपस्य स्थानिवत्त्वात् झलंतलक्षणो नुम् न। स्वविधौ स्थानिवत्त्वाभावाद्ज
तलक्षणो पिन। पिपठिषि। पिपठीर्भ्यां। पयः। पयसी। पयांसि। पयसा। पयोभ्यामित्यादि। सुपुम्। सुपुंसी। सुपुमांसि। अदः।
विभक्तिकार्यं। उत्वमत्वे। अमू। अमूनि। शेषं पुंवत्। इति हलंता नपुंसकलिंगाः। स्वरादिनिपातमव्ययं। स्वरादयो निपाताश्चा
व्ययसंज्ञाः स्युः। स्वर्। अंतर्। प्रातर्। पुनर्। सनुतर्। उच्चैस्। नीचैस्। शनैस्। ऋधक्। ऋते। युगपत्। आरात्। पृथक्। ह्यस्। श्वस्।
दिवा। रात्रौ। सायं। चिरं। मनाक्। ईषत्। जोषं। तूष्णीं। बहिस्। अवस्। समया। निकषा। स्वयं। वृथा। नक्तं। नञ्। हेतौ। इद्धा। अद्धा। सा

सि॰ कौ॰ मि। वत्। ब्राह्मणवत्। क्षत्रियवत्। सना। सनत्। उपधा। तिरस्। अंतरा। अंतरेण। ज्योक्। कं। शं। सहसा। विना। नाना। स्वस्ति। स्वधा।
४३ अलं। वषट्। श्रौषट्। वौषट्। अन्यत्। अस्ति। उपांशु। क्षमा। विहायसा। दोषा। मृषा। मिथ्या। मुधा। पुरा। मिथो। मिथस्। प्रायस्
मुहुस्। प्रवाहुकं। प्रवाहिका। आर्यहलं। आर्यहलमिति बलात्कारे। शाकटायनस्तु आर्येति प्रतिबंधे हलमिति प्रतिषेध विवादयोरित्या
ह। अभीक्ष्णं। साकं। सार्धं। नमस्। हिरुक्। धिक्। अथ। अम्। आम्। प्रताम्। प्रशान्। प्रतान्। मा। माङ्। आकृतिगणोयं॥ चादयः।
अह। एव। एवं। नूनं। शश्वत्। युगपत्। भूयस्। कूपत्। कुवित्। नेत्। चेत्। चण्। कच्चित्। यत्र। तत्र। नह। हंत। माकिः। माकीं। नकिः।
नकीं। आकीं। माङ्। नञ्। यावत्। तावत्। त्वै। न्वै। द्वै। रै। श्रौषट्। वौषट्। स्वाहा। स्वधा। वषट्। तुम्। तथाहि। खलु। किल। अथ। सुष्ठु।
स्म। आदह। उपसर्गविभक्तिस्वरप्रतिरूपकाश्च। अवदत्तं। अहंयुः। अस्ति। क्षीरा। अ। आ। इ। ई। उ। ऊ। ए। ऐ। ओ। औ। पशु। शु
कं। यथा। कथा। च। पाट्। प्याट्। अंग। है। हे। भोः। अये। द्य। विषु। एकपदे। युत्। आतः। चादिरप्याकृतिगणः। तद्धितश्चासर्वविभ ४३
क्तिः। यस्मात्सर्वा विभक्तिर्नोत्पद्यते स तद्धितांतोव्ययं स्यात्। परिगणनं कर्तव्यं। तसिलादयः। प्राक्पाशपः। शस्प्रभृतयः
प्राक्समासांतेभ्यः। अम्। आम्। कृत्वोर्थाः। तसिवती। नानाञाविति। तेनेहन। पचतिकल्पं। पचतिरूपं। कृन्मेजंतः।
क्त्वातोसुन्‌कसुनः। एदंतमव्ययं स्यात्। स्मारं। स्मारं। जीवसे। पिबध्यै। क्त्वातोसुन्कसुनः। एदंतमव्ययं स्यात्। कृत्वा। उ

दितोः। विसृपः। अव्ययीभावश्च। अधिहरि। अव्ययादाप्सुपः। अव्ययाद्विहितस्यापः सुपश्च लुक् स्यात्। तत्र शालायां। अथ
विहितविशेषणान्नेह। अत्युच्चैसौ। अव्ययसंज्ञायां यद्यपि तदंतविधिरस्ति तथापि न गौणे। आप्ग्रहणं व्यर्थं। अलिंगत्वात्। सदृशं
त्रिषु लिंगेषु सर्वासु च विभक्तिषु। वचनेषु च सर्वेषु यन्न व्येति तदव्ययं। इति श्रुतिर्लिंगकारकसंख्याभावपरा। वष्टिभागुरिरल्लोप
मवाप्योरुपसर्गयोः। आपं चैव हलंतानां यथा वाचा निशा दिशा। वगाहः। अवगाहः। पिधानं। अपिधानं इत्यव्ययानि ॥
स्त्रियां। अधिकारोयं समर्थानामिति यावत्। अजाद्यतष्टाप्। अजादीनामकारांतस्य च वाच्यं यत्स्त्रीत्वं तत्र द्योत्ये टाप् स्यात्।
अजाद्युक्तिर्ङीषो ङीपश्च बाधनाय। अजा। अतः। खट्वा। अजादिभिः स्त्रीत्वस्य विशेषणान्नेह। पंचाजी। अत्र हि समासार्थः समाहा
रः। नित्यं स्त्रीत्वं। अजा। एडका। अश्वा। चटका। मूषिका। एषु जातिलक्षणो ङीष् प्राप्तः। बाला। वत्सा। होडा। मंदा। विलाता। एषु वयसि प्र
थमे इति ङीप् प्राप्तः। संभस्त्राजिनशणपिंडेभ्यः फलात्। संफला। भस्त्रफला। क्रुंचापोरिति ङीस्वः। सदच्‌कांडप्रांतशतैकेभ्यः पुष्पात्
सत्पुष्पा। प्राक्पुष्पा। शूद्रा चामहत्पूर्वा जातिः। पुंयोगे तु शूद्री। अमहत्पूर्वा किं। महाशूद्री। क्रुंचा। उष्णिहा। देवविशा। ज्येष्ठा। क
निष्ठा। मध्यमेति। प्रसकं पुष्पा। पुंयोगेपि। कोकिला। जातावपि। मूलान्नञः। अमूला। नञः किं। शतमूली। ऋन्नेभ्यो ङीप्।
कर्त्री। दंडिनी। उगितश्च। उगिदंतात्प्रातिपदिकात्स्त्रियां ङीप् स्यात्। भवती। भवंती। पचंती। शप्श्यनोर्नित्यं। नुम्।

सि॰कौ॰ उगिदचामितिसूत्रे ऽचूग्रहणेन धातोश्चेदुगित्कार्यं तर्ह्यंचतेरेवेति नियम्यते। तेनेह न। उखास्रत्। पर्णध्वत्। किंतु। अनिदितामिति न
लोपः। पर्णध्वत्। अंचतेस्तु स्यादेव। प्राची। प्रतीची। वनोर च। वन्नंतात्तदंताच्च प्रातिपदिकात् स्त्रियां ङीप्स्यात् रश्चांतादे
४२ शः। वनितिङ्वनिप्क्वनिप्वनिपां सामान्यग्रहणं। प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदंतस्य ग्रहणं। तेन प्रातिपदि
कविशेषणात्तदंतांतमपि लभ्यते। सुत्वानं अतिक्रांतातिसुत्वरी। धीवरी। शर्वरी। वनो न हश इति वक्तव्यं। दृशं
ताद्धातोर्विहितो यो वन् तदंतात् तदंतांताच्च ङीप्रश्च नेत्यर्थः। ओणृ अपनयने। वनिप्। विड्वनोरनुनासिकस्यात्। अवावा। ब्रा
ह्मणी। राजयुध्वा। बहुव्रीहौ वा। बहुधीवरी। बहुधीवा। पक्षे डाप्वक्ष्यते। पादोऽन्यतरस्यां। पाच्छब्दः कृतसमासांतस्तदंतात् प्राति
पदिकात् ङीप्वा स्यात्। द्विपदी। द्विपात्। टाबृचि। ऋचिवाच्यायां पादंतात् टाप्स्यात्। द्विपदा ऋक्। एकपदा। न षट्स्वस्रादिभ्यः। पं
च। चतस्रः। पंचेत्यत्र नलोपे कृतेऽपि षट्संज्ञाभावान्न लोपः सुप्स्वरेति न लोपस्यासिद्धत्वान्न षट्स्वस्रादिभ्य इति नया ४२
प्। मनः। मन्नंतान्न ङीप्। सीमा। सीमानौ। अनो बहुव्रीहेः। अन्नंताद्बहुव्रीहेर्न ङीप्। बहुयज्वा। बहुयज्वानौ। डाबुभा
भ्यामन्यतरस्यां। सूत्रद्वयोपात्ताभ्यां डाब्वा स्यात्। सीमानौ। सीमे। दामानौ। दामे। न पुंसि दाम सीमा समरः। बहुयज्वानौ। बहुयज्वे।

अन उपधालोपिनोऽन्यतरस्यां। अन्नंताद्बहुव्रीहेरुपधालोपिनो वा ङीप्। पक्षे डाप्निषेधौ। बहुराज्ञी। बहुराज्ञ्यौ। बहुराजे। बहुराजानौ।
प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः। प्रत्ययस्थात्ककारात्पूर्वस्याकारस्येकारः स्यादापि परे। स आप् सुपः परो न चेत्। सर्विका। कारिका।
अतः किं। नौका। प्रत्ययस्थात् किं। शक्नोतीति शका। असुपः किं। बहुपरिव्राजका नगरी। कात्किं। नंदना। पूर्वस्य किं। परस्य मा भूत्।
कटुका। तपरः किं। राका। आपि किं। कारकः। मामकनरकयोरुपसंख्यानं। मामिका। नरान् कायतीति नरिका। त्यक्त्यपोश्च। दाक्षिणा
त्यिका। इहत्यिका। न यासयोः। यत्तदोस्त्येत्त्वं न स्यात्। यका। सका। यकां। तकां। त्यकन्श्च निषेधः। उपत्यका। अधित्यका। आशिषि वुन
श्च। जीवका। भवका। उत्तरपदलोपे न। देवदत्तिका। देवका। क्षिपकादीनां च। क्षिपका। ध्रुवका। कन्यका। चटका। तारका ज्योतिषि। अ
न्यत्र तारिका। वर्णका तांतवे। अन्यत्र वर्णिका। वर्तका शकुनौ प्राचां। उदीचां तु वर्तिका। अष्टका पितृदैवत्ये। आष्टिकान्या। सूतका
पुत्रिका। वृंदारकाणां वेति वक्तव्यं। द्वृत्वा। अ इति पदच्छेदः। कात्पूर्वस्याकारादेशो वेत्यर्थः। तेन पुत्रिकाशब्दे ङीन् वर्णस्य पक्षे इ
कारः। अन्यत्रेत्त्वबाधनाय मकारस्यैव पक्षे अकारः। सूतका। सूतिका इत्यादि। उदीचामातः स्थाने यकपूर्वायाः। यकपूर्वकस्य स्त्री
प्रत्ययाकारस्य स्थाने योऽकारस्तस्य कात्पूर्वस्येद्वा स्यादापि परे। केऽण इति ह्रस्वः। आर्यका। आर्यिका। चटकिका। चटकका। अ

सि· र्तः किम् । सांका । श्वभदासांका ॥ श्विका ॥ यत्नेति किम् । अश्विका । स्त्रीप्रसपः किम् ॥ शुभंयातीति शुभंया: अज्ञाता
शुभंयाः शुभंयिका ॥ धात्वंत यको न्तु नित्सं । सुनयिका । कृपाकिका । भस्त्रैषाजाज्ञाद्वास्वानञ्पूर्वाणामपि ॥ स्वे
सेलुप्तषष्ठीकं पदं । एषामतइद्वास्यात् ॥ तदंतविधिनैवासिद्धे नञ्पूर्वाणामपीति स्पष्टार्थं । भस्त्रा गरुत्या मुपस तौ
र्जनार्थं । अन्यस्य तु कित्तर स्तत्रैपोवसिद्धं । इत्याद्याएतया स्तुत्यं पूर्वयोर्नित्वा अं लवं त्ति विभक्तिमाश्रित्य
सुपइति प्रतिषेधात् । अनेषका । परमैषका ॥ अद्वके । परमद्वके । स्वशब्द ग्रहणं संज्ञोपसर्जनार्थं ॥ इहहि ॥४३॥
॥४३॥ आत: स्थानेइत्स्यतु वर्त्तस्वशब्दस्यौत्स्ना विशेषणं । नतु दैघ्यं ॥ असंभवात् ॥ नाप्यन्येषां । अव्यभिचा
रात् ॥ स्वशब्दस्तु । अनुपसर्जन मात्मी यवाची अकजर्हः ॥ अर्थांतरेतु न स्त्री ॥ संज्ञोपसर्जनीभूत
स्त्र कप्रत्ययां तत्वाद्यस्युदाहरणं । एवं चात्मी यायां । स्विका परमा वस्वकेतिनित्य मेवेत्सं । निर्भस्त्रि
का निर्भस्त्रका । एषका । एषिका । ऋ तपत निर्द्देशान्नेह विकल्पः [illegible] । एतिके । एतिका: ॥ अजिका

अजका । ज्ञका । ज्ञिका । द्विके । द्वके । निस्विका । निस्वका । अभाषितपुंस्काच्च । एतस्माद्विहितस्यातः स्थानेतइद्वास्यात् । गंगिका । गंगका । बहुव्रीहे
र्भाषितपुंस्कत्व तनोविहितस्य नित्यं । अज्ञाता । अस्वद्व । अस्वद्विका । शैषिके कपि तु विकल्प एव । आद्याचार्याणां । पूर्वसूत्रविषये आद्यस्या
त्ता त् । गंगाका । उक्तपुंस्का तु रुश्विका ॥ अनुपसर्जनात् । अधिकारोऽयं । यूनस्तिरित्यभिव्याप्य । अयमेव बह्वीजसंयेषु तदंतविधिं ज्ञापयति ।
चिद्गुणान्नृयसच्च दघ्नञ्मात्रच्च तयप् ठक् ठञ् कञ् क्वरपः । अनुपसर्जनं यह्रिदादि तदंतं यददंतं प्रातिपदिकं ततः स्त्रियां ङीप्रत्यया
त्ता त् । कुरुचरी । उपसर्जनेन्नेह । बहुकुरुचरा । नदट् । नदी । देवट् । देवी । वक्ष्यमाण सूत्र टिसा दुगि [illegible] ङीप्प्राप्तः । यासुटोङित्वेन
लाश्रयमनुबंधकार्यं नादेशानामिति ज्ञापकं न भवति । श्नः शानचः [illegible] न कश्चिदनुबंधकार्ये प्यनल्विधाविति निषेधज्ञापना
च्च । सौपर्णेयी । ऐंद्री । औत्सी । ऊरुद्वयसी । ऊरुदघ्नी । ऊरुमात्री । पंचतयी । आक्षिकी । लावणिकी । यादृशी । इत्वरी । ताद्धीलिकेणे ।
षि । चौरी । नञ्स्नञीकक्ख्युंस्तरुण तलुनानामुपसंख्यानं । स्त्रैणी । पौंस्नी । शाक्तीकी । आढ्यंकरणी । तरुणी । तलुनी । यञश्च । यञं
तात्स्त्रियां ङीप् स्यात् । अकारलोपे कृते । हल स्तद्धितस्य । हलउत्तरस्य उपधाभूतस्य तद्धितयकारस्य लोपः स्यादीतिपरे । गार्गी । अनप

सिद्धां। साधिकारस्तु। नङीप्। ङीपेव स्याद्द्वैप्या। अधिकारग्रहणात् दैवस्यापत्यं दैव्या। देवाद्यञञाविति प्राग्दीव्यतीयो न त्वपत्याधिकार
पठितः। प्राचां ष्फ तद्धितः। यञंतात् ष्फो वा स्यात् स्त्रियां। स च तद्धितः। षः प्रत्ययस्य। प्रत्ययस्यादिः षः इत्स्यात्। आयनेयीनी
यियः फढखछघां प्रत्ययादीनां। प्रत्ययादिभूतानां फादीनां क्रमात् आयन्नादय आदेशाः स्युः। तद्धितांतत्वात्प्रातिपदिकसं
४४ ज्ञा। षित्त्वसामर्थ्यात् ष्फेणोक्तेपि स्त्रीत्वे षिद्गौरेति वक्ष्यमाणो ङीष्। गार्ग्यायणी। सर्वत्र लोहितादिकतंतेभ्यः। लोहितादि
भ्यः कतशब्दांतेभ्यो यञंतेभ्यो नित्यं ष्फः स्यात्। लौहित्यायनी। कात्यायनी। कौरव्यमांडूकाभ्यां च। आभ्यां ष्फः स्यात्। क
र्मणाटाबूङीषोरपवादः। कुर्वादिभ्यो ण्यः। कौरव्यायणी। ढक्च मंडूकात् दित्यण्। मांडूकायनी। आसुरेरुपसंख्यानं। आसुराय ४४
णी। वयसि प्रथमे। प्रथमवयोवाचिनोऽदंतात् स्त्रियां ङीप् स्यात्। कुमारी। वयस्यचरम इति वाच्यं। वधूटी। चिरंटी। वधूटचि
रंटशब्दौ यौवनवाचिनौ। अतः किं। शिशुः। कन्यायान। कन्यायाः कनीन चेति निर्देशात्। द्विगोः। अदंताद्द्विगोर्ङीप् स्यात्।
त्रिलोकी। अजादित्वात् त्रिफला। त्र्यनीका। अपरिमाणबिस्ताचितकंबल्येभ्यो न तद्धितलुकि। अपरिमाणांताद्बिस्ताद्यंताच्च द्वि

गोर्ङीप् स्यात्। तद्धितलुकि सति। पंचभिरश्वैः क्रीता पंचाश्वा। आर्हीयष्ठक्। अध्यर्धेति लुक्। द्वौ बिस्तौ पचति द्विबिस्ता। द्व्याचि
ता। द्विकंबल्या। परिमाणात्तु द्व्याढकी। तद्धितलुकि किं। समाहारे पंचाश्वी। कांडांतात्क्षेत्रे। क्षेत्रे यः कांडांतो द्विगुस्ततो न ङीप्। तद्धि
तलुकि। द्वे कांडे प्रमाणमस्याः द्विकांडा क्षेत्रभक्तिः। प्रमाणे द्वयसज्जिति विहितस्य मात्रच प्रमाणे लो द्विगोर्नित्यमिति लुक्। क्षे
त्रे किं। द्विकांडी रज्जुः। पुरुषात्प्रमाणेन्यतरस्यां। प्रमाणे यः पुरुषस्तदंताद्द्विगोर्ङीब्वा स्यात् तद्धितलुकि। द्वौ पुरुषौ प्रमाणमस्याः
द्विपुरुषी। द्विपुरुषा वा। परिखा वा। ऊधसोऽनङ्। ऊधोंतस्य बहुव्रीहेरनङादेशः स्यात्। स्त्रियां। इत्यनङि कृते डाप् ङीप्निषेधेषु प्रा
प्तेषु। बहुव्रीहेरूधसो ङीष्। ऊधोंतात् बहुव्रीहेर्ङीष् स्यात् स्त्रियां। कुंडोध्नी। स्त्रियां किं। कुंडोधो धेनुकं। इहानङपि न। तद्धितो
स्त्रियामित्युपसंख्यानात्। संख्याव्ययादेर्ङीप्। ङीषोऽपवादः। द्व्यूध्नी। अत्यूध्नी। बहुव्रीहेरित्येव। ऊधोतिक्रांता अत्यूधाः। दामहायनां
ताच्च। संख्यादेर्बहुव्रीहेर्दामांताद्धायनांताच्च ङीप् स्यात्। दामांते टाप्प्रतिषेधयोः प्राप्तयोः हायनांते टापि प्राप्ते वचनं। द्विदाम्नी
अव्ययग्रहणाननुवृत्तेरुद्दामा वडवेत्यत्र डाप्प्रतिषेधौ वपि परत्वात्। द्विहायनी। बाला। त्रिचतुर्भ्यो हायनस्य णत्वं वाच्यं। व
योवाचकस्यैव हायनस्य ङीप्णत्वं चेष्यते। त्रिहायणी। चतुर्हायणी। वयसोन्यत्र द्विहायना। त्रिहायना। शाला।

सि॰कौ॰ नित्यंसंज्ञाछंदसोः अन्नंताद्बहुव्रीहेरुपधालोपिनोङीप् सुराज्ञीनामनगरी। अन्यत्रपूर्वेणविकल्पएव। वेदेतु शतमूर्ध्नी। केवलमा
मकभागधेयपापापरसमानार्यकृतसुमंगलभेषजाच्च। एभ्योनवभ्यो नित्यंङीप्स्यात् संज्ञाछंदसोः। अथातद्द्रः केवली विशः। भाग
२५ धेयी। पापी। अपरी। समानी। आर्यकृती। सुमंगली। भेषजी। अन्यत्रकेवलाइत्यादि। मामकग्रहणंनियमार्थं। अणंतत्वादेवसिद्धेः। ते १-
नलोके ऽ असंज्ञायांमामिका। अंतर्वत्पतिवतोर्नुक्। एतयोर्नुक्स्यात् स्त्रियां। अंतर्वत्नीतिङीप्। गर्भिण्यांजीवद्भर्तृकायांचप्रकृतिभागौ
निपात्येते। तत्रांतरस्त्यस्यांगर्भ इतिविग्रहे अंतःशब्दस्याधिकरणशक्तिप्रधानतया अस्तिसामानाधिकरण्याभावादप्राप्तोमतु
न्निपात्यते। पतिवत्नीत्यत्रनुवत्वंनिपात्यते। अंतर्वत्नी। पतिवत्नी। वसुदाहरणंतु अंतरस्त्यस्यांशालायांघटः। पतिमती पृथिवी।
पत्युर्नोयज्ञसंयोगे। पतिशब्दस्यनकारादेशः स्यात् यज्ञेनसंबंधे वसिष्ठस्यपत्नी। तत्कर्तृकयज्ञस्यफलभोक्त्रीत्यर्थः। दंपत्योः स
हाधिकारात्। विभाषासपूर्वस्य। पतिशब्दांतस्य सपूर्वस्यप्रातिपदिकस्यनोवास्यात्। गृहस्यपतिः गृहपतिः। गृहपत्नी। अनुप
सर्जनस्येतीहोत्तरार्थमनुवृत्तमपिनपत्युर्विशेषणं। किंतुतदंतस्य। तेनबहुव्रीहावपि। दृढपत्नी। दृढपतिः। वृषलपत्नी। वृषलप २५
तिः। अथवृषलस्यपत्नीतिव्यस्तेकथमितिचेत्। पत्नीवपत्नीत्युपचारात्। यद्वा। आचारक्विबंतात्कर्तरिक्विप्। आस्मिंश्चपक्षे
पत्नियौ। पत्नियइतिरूपं। विषयेविशेषः। सपूर्वस्यकिं। गवांपतिः स्त्री। नित्यंसपत्न्यादिषु। पूर्वविकल्पापवादः। सम

नस्यसभावोनिपात्यते। समानः पतिर्यस्याः सासपत्नी। वीरपत्नी। पूतक्रतोरैच। अस्याः स्त्रियां ऐ आदेशः स्यात्। ङीप्च। इयंत्रिसूत्रीपुं
योगएवेष्यते। पूतक्रतोः स्त्रीपूतक्रतायी। ययातुक्रतवः पूताः पूतक्रतुरेवसा। वृषाकप्यग्निकुसितकुसिदानामुदात्तः। एषामुदात्तऐ
आदेशः स्यात् ङीप्च। वृषाकपेः स्त्रीवृषाकपायी। हरविष्णूवृषाकपीइत्यमरः। वृषाकपायीश्रीगौर्योरितिच। अग्नायी। कुसितायी
। कुसिदायी। कुसिदशब्दोह्रस्वमध्योनतुदीर्घमध्यः। मनोरौवा। मनुशब्दस्यौकारादेशः स्यादुदात्तैकारश्चवा। तभ्या। संयोग
विशिष्टोङीप्। मनोःस्त्रीमनायी। मनावी। मनुः। वर्णादनुदात्तात्तोपधात्तोनः। वर्णवाचीयोऽनुदात्तांतस्तोपधस्तदंतादनुपसर्जना
प्रातिपदिकाद्वाङीप्स्यात्। तकारस्यनकारादेशश्च। एता। एनी। रोहिता। रोहिणी। वर्णानांतणतिनितांतानामितिफिट्सूत्रे
णाद्युदात्तः। त्रेण्योशलल्येतिगरह्यं। त्रीण्येतान्यस्यादुनिबहुव्रीहिः। अनुदात्तात्किं। श्वेता। घृतादीनांचेति अंतोदात्तोयं। अ
तदस्येव। शितिःस्त्री। पिशंगादुपसंख्यानं। पिशंगी। पिशंगा। असितपलितयोर्न। असिता। पलिता। छंदसिक्नमेके। असिक्नी १-
पलिक्नी। अवदातशब्दस्तुनवर्णवाची। किंतुविशुद्धिवाची। तेनावदातैव। अन्यतोङीष्। तोपधभिन्नाद्वर्णवाचिनोऽनुदात्ता
ताप्रातिपदिकात्स्त्रियांङीष्स्यात्। कल्माषी। सारंगी। लघावंतेद्वयोश्चबह्वषोगुरुरितिमध्योदात्तावेतौ। अनुदात्तात्किं। कृष्णा।
कपिला। षिद्गौरादिभ्यश्च। षिद्भ्योगौरादिभ्यश्चङीष्स्यात्। नर्तकी। गौरी। स्त्रियामाम्नोत्त्यः। अनड्वाही। अनडुही। पिप्प

सि·

८६

त्यादयश्च आकृतिगणोयं। सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः। अंगस्योपधाया यस्य लोपः स्यात्सेच घः। सूर्या घवयवः। मत्स्य
स्यङ्यां। सूर्यागस्त्ययोश्छे च ङ्यां च। तिष्यपुष्ययोर्नक्षत्राणि यलोप इति वाच्यं। मत्सी। मातरि षिच्चेति षित्वाद्वसिष्ठ गौरादिषु मा
तामहीशब्दपाठादनित्यः षित्तां ङीष्। जानपदकुंडगोणस्थलभाजनागकालनीलकुशकामुककबराद्वृत्त्यमत्रावपनाकृत्रिमा
श्राणास्थौल्यवर्णानाच्छादनायोविकारमैथुनेच्छाकेशवेशेषु। एकादशभ्यः प्रातिपदिकेभ्यः क्रमाद्वृत्त्यादिष्वर्थेषु ङीष् स्यात्
जानपदी। वृत्तिश्चेत्। अन्या तु जानपदी। उत्सादित्वादञंतत्वेन ङिद्वृति ङीं आद्युदात्तः। कुंडी। अमत्रं चेत्। कुंडान्या। कुडि दाहे।
गुरोश्च हलः इत्यप्रत्ययः। यस्तु अमते जारजः कुंड इति मनुष्यजातिवचनस्ततो जातिलक्षणो ङीष् भवत्येव। अमत्रे हि स्त्रीविषय
त्वादप्राप्तो ङीष् विधीयते। न तु नियम्यते। गोणी आवपनं चेत्। गोणान्या। स्थली अकृत्रिमा चेत्। स्थलान्या। भाजी श्राणा
चेत्। भाजान्या। नागी स्थूला चेत्। नागान्या। गजवाची नागशब्दः स्थौल्यगुणयोगादन्यत्र प्रयुक्त उदाहरणं। सर्पवाची तु दैर्घ्य
गुणादन्यत्र प्रयुक्तः प्रत्युदाहरणं। काली। वर्णश्चेत्। कालान्या। नीली अनाच्छादनं चेत्। नीलान्या। नील्या रक्ता शाटीत्यर्थः
। नील्या अन्वक्तव्य इत्यसन्। अनाच्छादनेपि न सर्वत्र। किंतु नीला ओषधौ। नीली। प्राणिनि च। नीली गौः। संज्ञायां वा। नीली
नीला। कुशी। अयोविकारश्चेत्। कुशान्या। कामुकी मैथुनेच्छा चेत्। कामुकान्या। कबरी केशानां संनिवेशविशेषः। ८६

कबरान्या। चित्रेत्यर्थः। शोणात्प्राचां। शोणी। शोणा। वोतो गुणवचनात्। उदंतात् गुणवाचिनो वा ङीष्। मृद्वी। मृदुः। उतः किं। शुचिः। गुणे
ति किं। आखुः। खरुसंयोगोपधान्न। खरुः पतिंवरा कन्या। पाण्डुः। बह्वादिभ्यश्च। एभ्यो वा ङीष्। बह्वी। बहुः। कृदिकारादक्तिनः। रात्रिः
। रात्री। सर्वतोऽक्तिन्नर्थादित्येके। शकटी। शकटिः। अक्तिन्नर्थात् किं। अजननिः। क्तिन्नंतत्वादप्राप्ते विध्यर्थं पद्धतिशब्दो गणे पठ्यते।
हिमकाषिहतिषु। पादस्य पद्भावः। पुंयोगादाख्यायां। या पुमाख्या पुंयोगात् स्त्रियां वर्तते ततो ङीष् स्यात्।
गोपस्य स्त्री गोपी।। पालकांतान्न। गोपालिका। अश्वपालिका। सूर्याद्देवतायां चाप् वाच्यः। सूर्यस्य स्त्री देवता सूर्या
देवतायां किं। सूरी। कुंती। मानुषीयं। इंद्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानु
क्।। एषामानुगागमः स्यात् ङीष् च।। इंद्रादीनां षण्णां मातुलाचार्ययोश्च पुंयोग एवेष्यते।। तत्र ङीषि सि
द्धे आनुगागममात्रं विधीयते। इतरेषां चतुर्णां मुभयं। इंद्राणी हिमारण्ययोर्महत्त्वे। महद्धिमं हिमानी। अर
ण्यानि।। यवाद्दोषे। दुष्टो यवो यवानी। यवनाल्लिप्यां। यवनानां लिपिर्यवनानी।। मातुलोपाध्याययोरानुग्वा

सि॰ कौ॰ मातुलानी। मातुली। उपाध्यायानी। उपाध्यायी। या तु स्वयमेवाध्यापिका। तत्र वा ङीष् वाच्यः। उपाध्यायी। उपाध्याया। आचार्यादणत्वं च। आचा
र्यस्य स्त्री आचार्यानी। पुंयोग इत्येव। आचार्या। स्वयं व्याख्यात्री। अर्यक्षत्रियाभ्यां वा स्वार्थे। अर्याणी। अर्या। स्वामिनी वैश्या वेत्यर्थः। क्षत्रियाणी
क्षत्रिया। पुंयोगे तु। अर्यी क्षत्रियी। कथं ब्रह्माणीति। ब्रह्माणमानयति जीवयतीति कर्मण्यण्। क्रीतात्करणपूर्वात्। क्रीतान्तादन्तात्करणादेः
४१ स्त्रियां ङीष्। वस्त्रक्रीती। क्वचिन्न। धनक्रीता। क्तादल्पाख्यायां। करणादेः क्तान्तादन्तात् स्त्रियां ङीष् स्यात्। जातिपूर्वादिति वक्तव्यं। दत्यल्पत्वे द्योत्ये
अभ्रविलिप्ती द्यौः। बहुव्रीहेश्चान्तोदात्तात्। बहुव्रीहेः क्तान्तादन्तोदात्तादन्तात् स्त्रियां ङीष् स्यात्। जातिपूर्वादिति वक्तव्यं। तेन बहुकृन्मु काल सुखा
दिपूर्वान्न। ऊरुभिन्नी। नेह। बहुकृता। जातान्तान्न। दन्तजाता। पाणिगृहीती भार्यायां। पाणिगृहीतान्या। अस्वाङ्गपूर्वपदाद्वा। पूर्वेण नित्ये प्रा
प्ते विकल्पोयं। सुरापीती। सुरापीता। अन्तोदात्तात्किं। वस्त्रच्छन्ना। अनाच्छादनादित्युदात्तप्रतिषेधः। अत एव पूर्वेणापि न ङीष्। स्वाङ्गा
च्चोपसर्जनादसंयोगोपधात्। असंयोगोपधमुपसर्जनं यत्स्वाङ्गं तदन्तादन्तात्प्रातिपदिकाद्वा ङीष्। केशानतिक्रान्ता। अतिकेशी। अ
तिकेशा। चन्द्रमुखी। चन्द्रमुखा। संयोगोपधात्तु सुगुल्फा। उपसर्जनात्किं। शोभना शिखा सुशिखा। स्वाङ्गं त्रिधा। अद्रवं मूर्तिमत्
स्वाङ्गं प्राणिस्थमविकारजं। स्वेसुदाद्रवत्वात् सुज्ञाना। अमूर्तत्वात्। सुमुखा शाला। अप्राणिस्थत्वात्। सुशोफा विकारजत्वात्।
अतत्स्थं तत्र दृष्टं च। सुकेशी सुकेशा वा रथ्या। अप्राणिस्थस्यापि प्राणिनि दृष्टत्वात्। तेन चेत्तत्र्यथायुतं सुस्तनी। सुस्तना वा प्रति

येनाङ्गेन प्राणि रूपं वस्तु यथायतं तेन न तत्स्थ शोनाङ्गेन तद्प्राणि वस्तु तथा प्राणिविधु ...येन तद्... प्राणिनि दृष्टं स्वाङ्गमित्यर्थः

निषेधो मा। प्राणिवदप्राणिसदृशे स्थितत्वात्। नासिकोदरोष्ठजङ्घादन्तकर्णशृङ्गाच्च। एभ्यो वा ङीष्। आद्ययोर्बह्वज्लक्षणो निषेधो बाध्यते। पुरस्तादपवाद
न्यायात्। ओष्ठादीनां पञ्चानां असंयोगोपधादिति बाध्यते। मध्येऽपवादन्यायात्। सहनञ्लक्षणस्तु प्रतिषेधः परत्वादस्य बाधकः। तुङ्गनासिकी। तुङ्ग
नासिका। इत्यादि नेह। सहनासिका। अनासिका। अत्र वृत्तिः। अङ्गगात्रकण्ठेभ्यो वक्तव्यं। स्वङ्गी। स्वङ्गेत्यादि। एतच्च अनुक्तसमुच्चयार्थेन चकारेण संग्रा
ह्यमिति केचित्। भाष्याद्यनुक्तत्वादप्रमाणमिति प्रामाणिकाः। अत्र वार्त्तिकानि। पुच्छाच्च। सुपुच्छी। सुपुच्छा। कबरमणिविषशरेभ्यो नित्यं। कबरं चि
त्रं पुच्छं यस्याः सा कबरपुच्छी। उपमानात्पक्षाच्च पुच्छाच्च नित्यमेव। उलूकपक्षी शाला। उलूकपुच्छी सेना। नक्रोडादिबह्वचः। क्रोडादेर्बह्वचश्च स्वाङ्गान्न
ङीष्। कल्याणक्रोडा। अश्वानामुरः क्रोडा। आकृतिगणोयं। सुजघना। सहनञ्विद्यमानपूर्वाच्च। सहेत्यादित्रिकपूर्वान्न ङीष्। सकेशा। अकेशा। वि
द्यमाननासिका। नखमुखात्संज्ञायां। न ङीष् स्यात्। शूर्पणखा। गौरमुखा। संज्ञायां किं। ताम्रमुखी कन्या। दिक्पूर्वपदान्ङीष्। दिक्पूर्वपदात्स्वाङ्गा
न्तात्प्रातिपदिकान्ङीषो ङीबादेशः स्यात्। प्राङ्मुखी। आद्युदात्तं पदं। वाहः। वाहन्तात्प्रातिपदिकान्ङीष् स्यात्। ङीषेवानुवर्तते। न ङीप्। दित्यवाट् चेमे
दित्यौह्यौ चेमे। सख्यशिश्वीति भाषायां। इति शब्दः प्रकारे भाषायामित्यस्यानन्तरं द्रष्टव्यः। तेन छन्दस्यपि क्वचित्। सखी। अशिश्वी। आधेनवो धुन
यन्तामशिश्वीः। जातेरस्त्रीविषयादयोपधात्। जातिवाचि यन्न च स्त्रियां नियतमयोपधं ततः स्त्रियां ङीष् स्यात्। आकृतिग्रहणा जातिः। अनुगतसं
स्थानव्यङ्ग्येत्यर्थः। तटी। लिङ्गानां च न सर्वभाक्। सकृदाख्यातनिर्ग्राह्या। असर्वलिङ्गत्वे सत्येकस्यां व्यक्तौ कथनाद्व्यक्त्यन्तरे कथनं विनापि सुग्रहा
जातिरिति लक्षणान्तरं। वृषली। असर्वलिङ्गेति किं। शुक्ला। सकृदित्यादि किं। देवदत्ता। गोत्रं च चरणैः सह। अपत्यप्रत्ययान्तः शाखाध्येतृवाची शब्दो जाति

ति नखमुखात्संज्ञायां ... बमे। १२६ च सिद्धाति। मे

इ[?]ते   ।।।ठपौ॰श्री   औपम्ये किं धनोरु[?]श्री

सि॰ कौ कार्येऽलभतस्त्र्यर्थेः। औपगवी। कठीबह्वृची। ब्राह्मणी अत्र तु शार्ङ्गरवादिपाठान्ङीनाङीष् बाध्यते। जातेः किं। मुंडा। अस्त्रीविषयात्किं। बलाका। अयोपधा
त्किं। क्षत्रिया। योपधप्रतिषेधे गवयहयमुकयमनुष्यमत्स्यानामप्रतिषेधः। गवयी। हयी। मुकयी। हलस्तद्धितस्येति यलोपः। मनुषी। मत्स्यस्य ङ्यां। मत्सी। पाककर्णपर्णपुष्पफलमूलवा
लोत्तरपदाच्च। पाकाद्युत्तरपदाज्जातिवाचिनः स्त्रीविषयादपि ङीष् स्यात्। ओदनपाकी। शंकुकर्णी। शंखपुष्पी। दासीफली। दर्भमूली। गोवाली। ओषधिविशेषे रूढा एते। इतो मनुष्यजातेः। ङीष् स्यात्। दाक्षी
४८ । योपधादपि। उदमेयस्यापत्यं औदमेयी। मनुष्येति किं। तित्तिरिः। ऊङुतः। उकारान्तादयोपधान्मनुष्यजातिवाचिनः स्त्रियामूङ् स्यात्। कुरूः। कुरुनादिभ्यो ण्यः। तस्य स्त्रियामवन्तीत्यादिना लुक्। अयो
पधात्किं। अध्वर्युर्ब्राह्मणी। अप्राणिजातेश्चारज्ज्वादीनामुपसंख्यानं। रज्ज्वादिपर्युदासादुवर्णान्तेभ्य एव। अलाबूः। कर्कन्धूः। अनयो दीर्घान्तत्वेनोदाहृताविति विभक्तिपुदान्तत्व प्रतिषेधपुंङ्‌फलं।
प्राणिजातेस्तु। कृकवाकुः। रज्ज्वादेस्तु रज्जुः। हनुः। बाह्वन्तात्संज्ञायां। स्त्रियामूङ्। भद्रबाहूः। संज्ञायां किं। वृत्तबाहुः। पङ्गोश्च। पंगूः। श्वशुरस्योकाराकारलोपश्च। चादूङ्। पुंयोगलक्षणस्य ङीषोऽप
वादः। लिंगविशिष्टपरिभाषया स्वादयः। श्वश्रूः। ऊरूत्तरपदादौपम्ये। उपमानवाचि पूर्वपदमूरूत्तरपदं यत्प्रातिपदिकं तस्मादूङ् स्यात्। करभोरूः। संहितशफलक्षणवामादेश्च। अनौपम्यार्थं सूत्रं। संहितोरूः।
सैव शफोरूः। शफौ खुरौ तावि[व] संश्लिष्टत्वादुपचारात्। लक्षणशब्दादर्श आद्यच्। लक्षणोरूः। वामोरूः। सहितसहाभ्यां चेति वक्तव्यं। हितेन सह सहिते ऊरू यस्याः सा सहितोरूः। सह ते[न] सहोरू[?] ऊरू यस्याः इ[?]
सा सहोरूः। यद्यप्यविद्यमानवचनस्य सहशब्दस्य ऊर्वतिशयप्रतिपादनाय प्रयोगः। संज्ञायां। कद्रुकमण्डल्वोः संज्ञायां। स्त्रियामूङ्। कद्रूः। कमंडलूः। संज्ञायां किं। कद्रुः। कमंडलुः। अच्छन्दोर्थं व
श्री चनं। शार्ङ्गरवाद्यञो ङीन्। शार्ङ्गरवादेरञो योऽकारस्तदन्ताच्च जातिवाचिनो ङीन् स्यात्। शार्ङ्गरवी। बैदी। जातेरित्यनुवृत्तेः पुंयोगे ङीषेव। नृनरयोर्वृद्धिश्चेति गणसूत्रं। नारी। यङश्चाप्। यङन्तात्स्त्रियां चाप् स्यात्। यङः षष्ठ्यञोः सामान्यग्रहणं। आम्बष्ठ्या। कारीषगन्ध्या। षाच्च। यञश्चाप् वक्तव्यः। पौतिमाष्या। आवट्याच्च। अस्माच्चाप् स्यात्। यञश्चेति ङीषोऽपवादः। अवटशब्दो
गर्गादिः।। आवट्या। तद्धिताः। आपञ्चमसमाप्तेरधिकारोऽयं। यूनस्तिः। युवन्शब्दात्तिप्रत्ययः स्यात् स्त्रियां स च तद्धितसंज्ञः। लिंगविशिष्टपरिभाषया सिद्धे तद्धिताधिकार
सा उत्तरार्थः। युवतिः। अनुपसर्जनादित्येव। बहवो युवानो यस्यां बहुयुवा। युवतीति तु यौतेः शत्रन्तान्ङीपि बोध्यं।। इति स्त्रीप्रत्ययाः ।। श्रीः

श्री:   श्री:   श्री:   अथ कारकप्रक्रिया   श्री: अश्रोपाध्यायेन श्यामस्य   श्री:   श्री:

संहितशफलक्षणवामादेश्च वामादेः प्रातिपदिका
दूरूत्तरपदात्स्त्रियामूङ् स्याद